# कुंभस्नानविधिः

**महन्त हरिशंकर दास 'वेदान्ती'**
अध्यक्ष
मन्दिर श्री रघुनाथ जी, जयपुर

वपनसामान्योदकेनस्नानादि कृत्वा तटमागत्याचम्य प्राणानायम्य। पुण्डरीकाक्षाय नमः इति त्रिवारं स्मृत्वा।

**संकल्पः** - देशकालौ संकीर्त्य तीर्थे कुंभस्नानस्य शास्त्रोक्तफल प्राप्त्यर्थं आत्मनःशुद्धिकामोहं श्रीपरमेश्वप्रीत्यर्थं तीर्थे कुंभस्नानमहं करिष्ये।(काम्य संकल्प आचार्य के निर्देश अनुसार करें)

**तीर्थ वन्दन स्नानानुज्ञां प्रार्थयेत् -**

नमोऽस्तु देवदेवाय शितिकण्ठाय वेधसे।
रुद्राय चापहस्ताय दण्डिने चक्रिणे नमः।।

(इमं मन्त्रं समुच्चार्य तीर्थस्नानंसमाचरेत्।
अन्यथा तत्फलस्यार्धं तीर्थेशो हरति ध्रुवम्।। )

सरस्वती च गायत्री वेदमाता गरीयसी।
सन्निधात्री भव त्वं च सर्वपापप्रणाशिनी।।

यद्वा सागर निर्घोष दण्डहस्तासुरान्तक।
जगत्स्रष्टर्जगन्मित्र नमामि त्वां सुरान्तक।।

तीक्ष्णदंष्ट्रमहाकाय कल्पान्तदहनोपम।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि।।

उत्तिष्ठन्तु महाभूता ये भूता भूमिवासिनः।
भूतानामविरोधेन स्नानकर्म समारभे।।

अपसर्पन्तु ते भूता ये भूता तीर्थदूषकाः।
ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया॥

पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा।
आगच्छन्तु पवित्राणि स्नानकाले सदा मम॥

त्वं राजा सर्वतीर्थानां त्वमेव जगतःपिता।
याचितं देहि मे तीर्थं तीर्थराज नमोऽस्तु ते॥

अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव।
वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे॥

अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु विचरन्ति याः।
देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वदा॥

इमं मन्त्रं समुच्चार्य तीर्थस्नानं समाचरेत् ।
अन्यथा तत्फलस्यार्धे तीर्थेशो हरति ध्रुवम् ॥

**कुम्भस्वरूपध्यानम्-**

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः॥
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः॥

पूजनम् - कुम्भस्थदेवताभ्यो नमः सकलपूजार्थे पूष्पाणि समर्पयामि ।

**कुम्भं प्रार्थयेत्-**

देवदानवसंवादे मथ्यमाने महोदधौ॥
उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम्।

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥

शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः।।

त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादात् कुंभस्नानं कर्तुमीहे जलोद्भव।।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा।।

**स्नानान्त तर्पण**

**देवता–**

भूर्लोकस्थ देवान् तर्पयामि।
भुवर्लोकस्थ देवान् तर्पयामि।
स्वर्लोकस्थ देवान् तर्पयामि।
त्रैलोक्यस्थ देवान् तर्पयामि।

**ऋषि–**

भूर्लोकस्थ ऋषीन् तर्पयामि।
भूर्लोकस्थ ऋषीन् तर्पयामि।
भुवर्लोकस्थ ऋषीन् तर्पयामि।
भुवर्लोकस्थ ऋषीन् तर्पयामि।

स्वर्लोकस्थ ऋषीन् तर्पयामि।
स्वर्लोकस्थ ऋषीन् तर्पयामि।

त्रैलोक्यस्थ ऋषीन् तर्पयामि।
त्रैलोक्यस्थ ऋषीन् तर्पयामि।

**पितृ–** (सच्छूद्र तक की चातुर्वर्णिक जातियाँ ही पितरों का तर्पण करें)

भूर्लोकस्थ पितॄन् तर्पयामि।
भूर्लोकस्थ पितॄन् तर्पयामि।
भूर्लोकस्थ पितॄन् तर्पयामि।

भुवर्लोकस्थ पितॄन् तर्पयामि।
भुवर्लोकस्थ पितॄन् तर्पयामि।
भुवर्लोकस्थ पितॄन् तर्पयामि।

स्वर्लोकस्थ पितॄन् तर्पयामि।
स्वर्लोकस्थ पितॄन् तर्पयामि।
स्वर्लोकस्थ पितॄन् तर्पयामि।

त्रैलोक्यस्थ पितॄन् तर्पयामि।
त्रैलोक्यस्थ पितॄन् तर्पयामि।
त्रैलोक्यस्थ पितॄन् तर्पयामि।

**सव्य होकर यक्ष्मातर्पण** (नदी का जल लेकर मन्त्र पढ़कर तट पर डालना है)–

यन्मया दूषितं तोयं शारीरमल सम्भवात्।
तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहम्।।

तटपर आकर सच्छूद्र तक के विशुद्ध चातुर्वणिको को अपनी शिखा निचोडनी चाहिये -

लता गुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः।
ते सर्वे तृप्तिमायान्तु मयोत् सृष्टैः शिखोदकैः।।

स्नानवस्त्र को चौगुना करके वस्त्र की किनारी ऊपर की और रहे इस तरह दोंनों हाथ से वस्त्र निचोडे -

ततो स्नावस्त्रं चतुर्गुणं कृत्वा निष्पीडनम् -

**अर्घ्यदान-**

एहि सूर्य !सहस्त्रांशो तेजोराशे जगत्पते।
अनुकम्पय मां देव गृहाणार्घ्यं नमोऽस्तु ते।।

विष्णवे नमो विष्णवे नमो विष्णवे नमः ।।

कुंभस्नानसाङ्गतासिद्ध्यर्थं ब्राह्मणेभ्यो दक्षिणां दत्वा दीनानाथेभ्यः यथोत्साहेन तोषयेत्।।